ॐ

काण्वशाखीया

ईशावास्योपनिषत्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः

ॐ ईशा वास्यमिदꣳसर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१॥

श्रीमच्छङ्करभगवत्पादाचार्यविरचितं भाष्यम्

ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्याऽऽत्मनो याथात्म्यप्रकाशकत्वात् । याथात्म्यं चाऽऽत्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम् । तच्च कर्मणा विरुध्येतेति युक्त

श्रीमदानन्दगिर्याचार्यकृता भाष्यटीका

येनाऽऽत्मना परेणेशा व्याप्तं विश्वमशेषतः ।
सोऽहं देहद्वयीसाक्षी वर्जितो देहतद्गुणैः ॥ १ ॥

ईशा वास्यमित्यादिमन्त्रान्व्याचिख्यासुर्भगवान्भाष्यकारस्तेषां कर्मशेषत्वशङ्कां तावद्व्युदस्यति । तथाहि—कर्मजडाः केचन मन्यन्ते स्म । ईशा वास्यमित्यादयो मन्त्राः कर्मशेषा मन्त्रत्वाविशेषादिष्टेत्वादिमन्त्रवत् । अतः पृथक्प्रयोजनाद्यभावादव्याख्येया इति तान्प्रत्याह—**ईशा वास्यमित्यादय इति । कर्मस्वविनियुक्ता इति ।** [1]इषे त्वेति शाखां छिनत्तीत्यादिवद्विनियोजकप्रमाणादर्शनात्प्रकरणान्तरत्वाच्चेत्यर्थः । [2]श्रौतविनियोगाभावेऽपि 'बर्हिर्देवसदनं दामी'त्यस्य बर्हिर्लवनप्रकाशनसामर्थ्याद्बर्हिर्लवने यथा विनियोगस्तथा कर्मशेषात्मप्रकाशनसामर्थ्येन कर्मस्वेषां विनियोग इत्यपि नाऽऽशङ्कनीयमित्याह—**तेषामिति ।** शुद्धत्वादिविशेषणस्याऽऽत्मनः कर्मशेषत्वे प्रमाणाभावात्तद्याथात्म्यं न केवलं कर्मानुपयोगि किन्तु कर्मणा विरुध्यते चेत्याह—**याथात्म्यं चेति ।** शुद्धोऽहं स्वभावतो नाऽऽगन्तुकेनापि पाप्मना विद्धः सर्वत्रैकोऽशरीर आकाशोपम इति जानन्न कटाक्षेणापि कर्म वीक्षते । किन्त्वापातप्रतिपत्तिरप्येतादृशी[3] निरुणद्धयेव कर्मप्रवृत्तिमित्यर्थः । किञ्च यः कर्मशेषः स उत्पाद्यो दृष्टो यथा

१. इषे त्वा इति यजुर्मन्त्रः दर्शपूर्णमासयागे गोवत्सस्य मातृसकाशादपाकरणाय शाखाच्छेदनकाले पठनीयः । सिद्धान्ते उक्तानुमाने प्रकरणस्थत्वं विनियोजकप्रमाणवत्त्वं चोपाधिरित्यभिप्रायः ।

२. व्रीहिभिर्यजेत इत्यादौ तृतीयाश्रुत्या व्रीहीणां दर्शपूर्णमासयागे साधनत्वेन विनियोगो दृष्टः । अत्र तु विभक्त्यादिश्रुतयो न सन्ति । न च यथा 'बर्हिर्देवसदनं दामी'ति मन्त्रस्य दर्शपूर्णमासप्रकरणस्थस्य श्रुत्या विनियोगाभावेऽपि बर्हिर्लवनप्रकाशनसामर्थ्यरूपेण लिङ्गेन श्रुतिकल्पनाद्वारा विनियोग इष्टः, तथा ईशावास्यमित्यादिमन्त्राणां कर्माङ्गभूतकर्तृस्वरूपप्रकाशकत्वात् तेन सामर्थ्येन सर्ववैदिककर्मसु तेषां विनियोगो भवतु—इति वाच्यम् । तेषां शुद्धात्मप्रकाशकत्वेन कर्माङ्गभूतस्य कर्तृत्वादिगुणकस्यात्मनः प्रकाशकत्वाभावात् इत्यर्थः ।

३. आपातप्रतिपत्तिः—आत्मा अकर्ता अभोक्ता इति परोक्षज्ञानमपि कर्मप्रवृत्तिं निवारयति यतः विधिषु श्राद्धोऽधिकारीति निर्णीतत्वात् आत्मनः कर्तृत्वादिविषये श्रद्धारहितो न कर्माधिकारी किन्तु संन्यासे । (भामती १-१-१)

एवैषां कर्मस्वविनियोगः। न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात्।* सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात्। गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। यो हि कर्मफलेनार्थी[1] दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्याधिकारविदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनाऽऽत्मविषयं स्वाभाविकमज्ञानं[2] निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति इत्येवमुक्ताधिकार्यभिधेयसम्बन्धप्रयोजनान्मन्त्रान्संक्षेपतो व्याख्यास्यामः॥

पुरोडाशादिः[3]। विकार्यः सोमादिः। आप्यो मन्त्रादिः। संस्कार्यो व्रीह्यादिस्तदुत्पाद्यादिरूपत्वं व्यापकं व्यावर्तमानमात्मयाथात्म्यस्य कर्मशेषत्वमपि व्यावर्तयति। तथाऽऽत्मयाथात्म्यं कर्तृ भोक्तृ च न भवति। येन ममेदं समीहितसाधनं ततो मया कर्तव्यमित्यहङ्कारान्वयपुरःसरः कर्त्रन्वयः स्यादित्याह—**नह्येवमिति**। ननूपनिषदां [4]जपोपयोगित्वादन्यस्य च प्रमाणस्यादर्शनान्नास्त्येवैतादृशमात्मयाथात्म्यं तत्राऽऽह—**सर्वासामिति**। "यत्परः शब्दः स शब्दार्थः" इति मीमांसाप्रसिद्धेः सर्वासामुपनिषदां चैकात्म्ये [5]तात्पर्यदर्शनान्न जपोपयोगित्वमुपनिषदां शक्यं वक्तुम्।

तथाहि—ईशा वास्यमित्युपक्रम्य स पर्यगाच्छुक्रमित्युपसंहारादनेजदेकं तदन्तरस्य सर्वस्येत्यभ्यासदर्शनान्नैनद्देवा आप्नुवन्नित्यपूर्वतासङ्कीर्तनात् को मोहः कः शोक एकत्वमनुपश्यत इति फलवत्तासङ्कीर्तनात्कुर्वन्नेवेहेति जिजीविषोर्भेददर्शिनः कर्मकरणानुवादेनासुर्या नाम त इति निन्दयैकात्म्यदर्शनस्य स्तुतत्वात्तस्मिन्नपो मातरिश्वा दधातीति [6]युक्त्यभिधानाच्चास्यास्तावदुपनिषद ऐकात्म्यतात्पर्यं दृश्यते। एवमन्यासामप्युप-

---

१. कर्मफलेनार्थीत्यादिः। तदुक्तं मीमांसाभाष्ये—
(१) स्वर्गकामस्य यागकर्मोपदेशः स्यात् (६–१–१)
(२) तस्मात् साङ्गयागोपदेशः न निरङ्गयागोपदेशः। असमर्थानां विगुणो यागः (६–१–२)
(३) तस्मादनधिकृतो अग्निहोत्रादिषु शूद्रः अग्न्यभावात् (६–१–४)

२. अज्ञानं निवर्तयन्तः आत्मैकत्वादिविज्ञानमुत्पादयन्ति इत्यनेन ज्ञानसमकालमेवाज्ञानाभावः न तु अज्ञानस्य ज्ञानोत्तरक्षणे ज्ञानान्निवृत्तिः इति सूचितम्। अधिकारीति ज्ञानकामोऽधिकारी, अभिधेयं ब्रह्म, प्रयोजनं मोक्षः, सम्बन्धश्च यथायथम्मूह्यः।

३. पुरोडाशः पिष्टपिण्डः उष्णोदकसंयोजनेन पिष्टनिष्पाद्यः। सोमः लताविशेषः तस्य निष्पीडनेन रसो भवति स च सोमविकारः। मन्त्राः अध्ययनेन प्राप्याः स्वाधीनोच्चारणयोग्यतां प्रापणीयाः। व्रीहीणां प्रोक्षणादिकं संस्कारः।

४. जपोपयोगित्वात्=अत एव स्वप्रतिपाद्यार्थेऽप्रामाण्यात्।

५. तात्पर्याच्छब्दवृत्तिः इति प्रसिद्धेरेवायमनुवादः। षड्विधतात्पर्यलिङ्गान्याह—तथा हीति।
(१) उपक्रमोपसंहारौ, (२) अभ्यासः, (३) अपूर्वता, (४) फलं, (५) अर्थवादः, (६) उपपत्तिश्चेति तात्पर्यानुमापकानि लिङ्गानि षट्।
(१) विचार्यप्रकरणस्याद्यन्तवाक्ययोः एकार्थपर्यवसानं लक्ष्यते। (२) अभ्यासः अनन्यपरपुनःश्रवणं। (५) अर्थवादः स्तुतिर्निन्दा वा। एतत् त्रयं शब्दनिष्ठम् तत्राद्यं एकार्थनिर्णायकत्वेन लिङ्गम्। अभ्यासः आदरद्वारा तात्पर्यनिर्णायकः। तेनार्थस्योत्कृष्टत्वज्ञानम्। उपपत्त्या प्रतिपाद्यस्याबाधितत्वं ज्ञायते। ततश्च अपूर्वताफलोपपत्तिभिः अनधिगताबाधितफलवदर्थबोधकत्वरूपं प्रामाण्यं ज्ञाप्यते। अर्थवादेन अर्थस्य बलवदनिष्टाननुबन्धित्वं ज्ञाप्यते।

६. युक्त्यभिधानात्=मातरिश्वहिरण्यगर्भस्य फलप्रदानसामर्थ्यं अन्याधीनं तस्य उत्पत्तिमत्त्वे सति फलदातृत्वात् अस्मदादिवत्—इत्यनुमानात्।

ईशा वास्यमित्यादि[1]। **ईशा ईष्ट इतोट् तेनेशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन्प्रत्यगात्मतया; तेन स्वेन रूपेणाऽऽत्मनेशा [2]वास्यमाच्छादनीयम्। किम्। इदं सर्वं यत्किञ्चि-**

निषदामुपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलवत्तार्थवादयुक्त्युपपादनानि षट् तात्पर्यलिङ्गानि विकल्पेन समुच्चयेन चास्माभिस्तत्त्वालोके[3] दर्शितानीति नेह प्रतन्यन्ते।

किञ्च प्रत्ययसम्वादोऽपि बलवत्त्वे कारणं प्रसिद्धम्। विद्यते चोपनिषदर्थे गीतादिसम्वादस्तस्मादुपनिषत्पदसमन्वयेनावगम्यमानमैकात्म्यं न प्रमाणान्तरानुपलम्भविरोधेनापलपनीयम्। यथेन्द्रियान्तरेणानवगम्यमानमपि रूपं चक्षुषाऽवगम्यमानं नापह्नूयते तथैकात्म्यमपि नापह्नवार्हमित्याह—**गीतानामिति**। "समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्। विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति" इत्यादिगीतानाम्। 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इत्यादिमोक्षशास्त्राणां चैकात्म्यपरत्वादित्यर्थः। यद्येतादृशमात्मतत्त्वं तर्हि निरधिकारित्वात्कर्मकाण्डमुच्छिद्येतेत्यपि नाऽऽशङ्कनीयमित्याह—**तस्मादिति**। औपनिषदात्मयाथात्म्यविज्ञानवत इष्यत एव कर्मकाण्डाप्रामाण्यम्। [4]यथा 'न हिंस्यात्सर्वा भूतानी'ति निषेधशास्त्रार्थनिश्चयवत इष्यत एव श्येनादिविध्यप्रमाण्यम्। यथा च तीव्रक्रोधाक्रान्तस्वान्तं प्रत्येव [5]श्येनादिविधिप्रामाण्यं तथा मिथ्यात्मदर्शिनं प्रत्येव कर्मविधिप्रामाण्यमित्यर्थः। अत्र **जैमिनिप्रभृतीनां सम्मतिमाह—यो हीत्यादिना**। अर्थित्वादियुक्तस्य कर्मण्यधिकारः षष्ठेऽध्याये प्रतिष्ठापितः। अर्थित्वादि च मिथ्याज्ञाननिदानम्। न हि नभोवन्नि-

---

१. ईशा ईश्वररूपेण इदं सर्वमाच्छादनीयम्। कारणात्मकेश्वररूपेण ज्ञातव्यं कार्यस्योपादानव्यतिरेकेणाभावात् चेतनानां च ब्रह्माभेदात् सकलमिदमहं च वासुदेवः इति ज्ञातव्यम् जगत्यां पृथिव्यां इदमुपलक्षणं सर्वत्र वर्तमानं स्थावरजङ्गमात्मकं जगत् ग्राह्यम्—सायणः।
त्यक्तेन—त्यागेन आत्मानं पालयेथाः त्याग एवात्मरक्षणोपायः संग्रहस्य बन्धहेतुत्वात्। अत्र संन्यास उक्तः। तेन त्यक्तेन मिथ्यात्वेन निश्चितप्रपञ्चेन आत्मानं ब्रह्मरूपेण विज्ञाय रक्ष। एषणात्रयसंन्यासेन च।

२. अत्र माध्वैः ईशस्य आवास्यं इति विग्रह्य ईशप्रविष्टमित्यर्थः स्वीकृतः। ईशा इति पृथक्पदमिति पदपाठविदः। तद्विरुद्धमिदम्। अपि च समस्तपदत्वे समासस्येत्यन्तोदात्तस्वरः स्यात्। ततः वा इत्यन्तं अनुदात्तं स्यात् 'पञ्चानां त्वा पञ्चजनानां' इतिवत्। अतो नेदं युक्तम्। तेन त्यक्तेन = ईश्वरदत्तेन इत्यर्थः कृतः। त्यागो न दानं अपि तु दानपदार्थैकदेशः, तेनात्र लक्षणा भवेत्। त्यक्तेन भोगासम्भवात् त्यागेनात्मानं पालयेदिति युक्तं 'त्यागेनैके अमृतत्वमानशुरि'ति श्रुतेः। वस्तुतो भोगे मोक्षे वा पुरुषप्रयत्नः कारणम्, अत्र तस्य निवारणं विधीयत इत्यनौचित्यम्।

मतान्तरे—ईशा इति यौगिकं विष्णुपरं न तु रूढ्या शिवपरं शिवस्य विष्णुकार्यत्वात् कर्मवश्यत्वाच्चेति। तन्न। "ब्रह्मविष्णुरुद्रास्ते सम्प्रसूयन्ते। कारणं तु ध्येयः सर्वैश्वर्यसम्पन्न शम्भुराकाशमध्ये" "यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः"। "मायिनं तु महेश्वरम्" स कारणं करणाधिपाधिप" इत्यादिश्रुतिसिद्धस्य यस्मिन्नीश्वर इत्यनन्यविषयः शब्द—इति रूढ्युपोद्बलितस्य शिवस्यैव शीघ्रोपस्थितेः। वास्यं न व्याप्यं तस्य उत्तरत्र सपर्यगादित्युक्तत्वात्।

३. तत्त्वालोके जनार्दनकृते भारतीयविद्याभवने मुद्रिते छान्दोग्यषष्ठे प्रसिद्धानि षट् तात्पर्यलिङ्गानि प्रदर्शितानि नान्यत्रोपनिषत्सु।

४. यथा न हिंस्यादिति। यथा अहिंसाशास्त्रयागीयपशुहिंसाशास्त्रयोः द्वयोरपि प्रामाण्यात् द्वयोरेक वाक्यताङ्गीकारात् यागीयहिंसाभिन्नहिंसाया अधर्मत्वं तथा अत्र विद्याविद्ययोरुभयोः समुच्यविधानात् एकवाक्यत्वं न कस्यापि बाधकमित्यर्थः।

५. श्येनादिविधिः श्येनयागः मरणकामाय विहितं आभिचारिकं कर्म। तेन अनुष्ठितेन वैरी म्रियते यजमानस्य नरकं च जायते।

जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनाऽऽत्मनेशेन प्रत्यगात्मतयाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना। यथा चन्दनागर्वादेरुदकादिसम्बन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाऽऽच्छाद्यते स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं जगत्यां पृथिव्यां जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया व्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो वा भृत्यो वाऽऽत्मसम्बन्धिताया अभावादात्मानं पालयत्यतस्त्यागेनेत्ययमेव वेदार्थः। **भुञ्जीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः, गृधिमाकाङ्क्षां मा कार्षीर्धनविषयाम्। कस्यस्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः। कस्मात्? कस्यस्विद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद्गृध्येत। आत्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः॥ १॥**

ष्क्रियस्य स्वत एव दुःखासंसर्गिणः परमानन्दस्वभावस्य सुखं मे स्याद्दुःखं मे मा भूदित्यर्थित्वं शरीरेन्द्रियसामर्थ्येन च समर्थोऽहमित्यभिमानित्वं मिथ्याज्ञानं विना सम्भवतीत्यर्थः। यस्मादात्मयाथात्म्यप्रकाशका मन्त्रा न कर्मविधिशेषभूता न च मानान्तरविरुद्धास्तस्मात्प्रयोजनादिमत्त्वमपि तेषां सिद्धमित्याह—**तस्मादेत इति**। व्याख्येयत्वमुक्त्वा प्रतिपदं व्याचष्टे–**ईशेति**। 'ईश' ऐश्वर्ये इत्यस्य धातोः क्विपि लुप्ते कृदन्तं रूपमीट् तस्य तृतीयैकवचनमीशेति। ननु कर्तरि क्विब्विधानात्परमात्मनश्चाविक्रियत्वात्कथं क्विबन्तशब्दवाच्येतेति तत्राऽऽह—**ईशितेति**। मायोपाधेरीशनकर्तृत्वसम्भवात् क्विबन्तशब्दवाच्यता न विरुध्यते निरुपाधिकस्य च लक्ष्यत्वं भविष्यतोत्यर्थः। ईशित्रीशितव्यभावेन तर्हि भेदः प्राप्त इत्याशङ्क्याऽऽह—**सर्वजन्तूनामात्मा सन्निति**। यथाऽऽदर्शादिषु प्रतिबिम्बानामात्मा सन् बिम्बभूतो देवदत्त ईशिता भवति तथा कल्पितभेदेनेशित्रीशितव्यभावसम्भवान्न वास्तवभेदानुमानं सम्भवतीत्यर्थः। 'वस' आच्छादने। अस्य रूपं वास्यम्। तत्त्वत ईश्वरात्मकमेव सर्वं भ्रान्त्या यदनीश्वररूपेण गृहीतं तत्सर्वमीश्वर एवाऽऽत्मैवेति ज्ञानेनाऽऽच्छादनीयम्। सर्वात्मक ईश्वरोऽस्मीति ज्ञातव्यमेष तत्त्वोपदेशश्छान्दोग्ये तत्त्वमसीतिवदित्यर्थः।

'ब्रह्मैव सर्वमात्मैव सत्प्रकाशाविशेषतः। हेयोपादेयभावोऽयं न सन्स्वप्नवदीर्यते॥'

उक्तं च—

'न बन्धोऽस्ति न मोक्षोऽस्ति न विकल्पोऽस्ति तत्त्वतः। नित्यप्रकाश एवास्ति विश्वाकारो महेश्वरः॥' इति।

यस्यौपदेशिकज्ञानमात्रेणानृतदृष्टिर्न तिरस्क्रियते तस्य विचारादिप्रयत्नेन तत्त्वप्रकाशे सत्यनृतदृष्टिस्तिरस्क्रियेतेत्यभिप्रेत्य दृष्टान्तमाह—**यथेति**। चन्दनागर्वादेरुदकादिसम्बन्धादार्द्रीभावादिना जातं यद्दौर्गन्ध्यमौपाधिकं मिथ्या तद्यथा तत्स्वरूपनिघर्षणाभिव्यक्तेन स्वाभाविकेन गन्धेनाऽऽच्छाद्यते तद्वद्विचारादेः स्वरूपसद्भावान्मिथ्याबुद्धेर्बाधकत्वं सम्भवतीत्याह—**तद्वदेव होति**। स्वभावोऽनादिरविद्या तत्कार्यं स्वाभाविकमित्यादिबाधयोग्यत्वप्रदर्शनार्थं विशेषणम्। एवं विचारादिप्रयत्नवतोऽनृतदृष्टितिरस्कारसम्भावनामुक्त्वा युक्त्यनभिज्ञस्य सर्वमिदमहं चेश्वर एवेति भावनायामधिकृतस्य युक्तिकुशलस्य च विचारेऽधिकृतस्य सर्वकर्मसंन्यास एवाधिकार इह मन्त्रे विवक्षितस्तेन त्यक्तेनेत्यत्र त्यागपरामर्शात्। "त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमि"त्यन्यत्राप्युक्तत्वात्पुत्राद्येषणायाश्चित्तविक्षेपहेतुत्वेन प्रसिद्धत्वाच्चेत्यभिप्रेत्याऽऽह—**एवमीश्वरात्मेति**। चिकीर्षितं संन्यासं स्तौति—**तेन त्यक्तेनेति**। त्यागेनाऽऽत्मा रक्षितः स्यान्निष्क्रियात्मस्वरूपावस्थानानुकूलत्वात्त्यागस्येत्यर्थः। संन्यासिनः शरीरसंधारणोपयुक्तकौपीनाच्छादनभिक्षाशनादिव्यतिरिक्तेऽपि कथञ्चिद्द्रव्यपरिग्रहे रागश्चेत्प्राप्नोति तन्निरोधे यत्नः कर्तव्यः। तस्य प्रधानविरोधित्वादित्यभिप्रेत्य नियमविधिमाह—**एवं त्यक्तैषण इति**। स्विदिति निपातस्य सामान्यार्थत्वेऽपि कस्यस्विदिति वितर्कार्थित्वमन्यत्र प्रसिद्धं तदिह न गृह्यत इत्यनर्थकमित्युक्तम्। व्यवहारदृष्ट्याऽप्यात्मन एवेदं सर्वं शेषभूतं जडस्य चित्परतन्त्रत्वादतोऽप्राप्ते विषये नाऽऽङ्क्षा कर्तव्या। परमार्थतस्त्वात्मैव सर्वमित्याकाङ्क्षाविषय एव नास्तीत्यर्थः॥ १॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतयाऽऽत्मा रक्षितव्य इत्येष वेदार्थः । अथेतरस्यानात्मज्ञतयाऽऽत्मग्रहणायाशक्तस्येदमुपदिशति मन्त्रः—कुर्वन्नेवेति । [1]कुर्वन्नेवेह निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितुमिच्छेच्छतं शतसंख्याकाः समाः संवत्सरान् । तावद्धि पुरुषस्य परमायुर्निरूपितम् । तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते । एवमेवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात्प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्स्यस इत्यर्थः । अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् । कथं पुनरिदमवगम्यते पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति । उच्यते । ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम् ? इहाप्युक्तं यो हि जिजीविषेत्स कर्म कुर्वन् । ईशा वास्यमिदं सर्वं तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमिति च । "न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदम् । ततो न पुनरियादि"ति संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति । "इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण" निवृत्तिमार्गेणैषणात्रयस्य त्यागः । तयोः

आद्यमन्त्रस्य पूर्वार्धेन तत्त्वोपदेशः कृतस्तृतीयपादेनापरिपक्वज्ञानस्य संन्यासविधिरुक्तश्चतुर्थपादेन संन्यासिनो नियमविधिरुक्त इति प्रतिपदं व्याख्याय संक्षिप्यार्थमनुवदत्युत्तरस्य सम्बन्धाभिधित्सया—**एवमात्मविद इत्यादिना** । पूर्वमन्त्रेण ज्ञानं विहितं यस्य तस्यैवोत्तरमन्त्रेण कर्म विहितं ततः समुच्चयानुष्ठाने तात्पर्यं मन्त्रद्वयस्येत्येकदेशिशङ्कामुद्भावयति—**कथं पुनरिति** । शुद्धब्रह्मज्ञानकर्मणी नैकाधिकारे विरुद्धत्वाद्दृतुगमनत्रिदण्डिधर्मवत् । अस्त्येव तत्रापि क्रमेणैककर्तृकत्वमिति चेन्न । विशिष्टरूपभेदाद्भिन्नाधिकारत्वात्[2] । **यच्चोक्तं**—ज्ञानकर्मणोर्वेदविहितत्वेन शुद्धिसाम्याद्विरोधोऽसिद्ध इति तदसत् । ऋतुगमनत्रिदण्डिधर्मयोरप्यविरोधप्रसङ्गात् । तदुभयं नैकस्य विहितमिति चेत्तुल्यमेतत् । प्रतिषेधात्तत्र न समुच्चय इति चेदिहापि 'न कर्मणा न प्रजया' 'नानुध्यायाद्बहूञ्छब्दानि'त्यादिप्रतिषेधस्तुल्यः । केवलकर्मविषयो निषेध इति न च वाच्यं केवलपदव्यवच्छेद्याभावात्समुच्चयविधेरद्याप्यनिश्चितत्वात्तस्मान्न समुच्चये तात्पर्यं मन्त्रद्वयस्येत्याह—**ज्ञानकर्मणोर्विरोधमिति** । कर्तृत्वाद्यध्यासाश्रयं कर्म शुद्धत्वाकर्तृत्वादिज्ञानेनोपमृद्यत इति सम्बन्धग्रन्थे यथोक्तं सहानवस्थानलक्षणं विरोधं किं न स्मरसि येनैकाधिकारत्वं तयोः कल्पयसीत्यर्थः । मन्त्रलिङ्गादपि तयोर्भिन्नाधिकारत्वं प्रतीयत इत्याह—**इहाप्युक्तमिति** । जिजीविषो रागिणः कर्म विहितं सर्वमीश्वर एवेति ज्ञानवतस्त्यागो विहितः । किञ्च धनसम्पन्नस्यैव कर्मण्यधिकारः । प्रथममन्त्रार्थाधिकारिणश्च धनाकाङ्क्षानिषेधेन कर्माधिकारनिषेधः प्रतीयत इत्यर्थः । जिजीविषा हि कर्माधिकारिण एव न ज्ञानाधिकारिण इत्यत्र प्रमाणमाह—**न जीवित इति** । अरण्यं स्त्रीजनासङ्कीर्णमाश्रममियाद्गच्छेदिति **पदं** वेदशास्त्रस्थितिस्ततोऽरण्यवासोपलक्षितात्संन्यासान्न पुनरियात्कर्मश्रद्धया न प्रत्यावृत्तिं कुर्यादिति जिजीविषादिरहितस्य संन्यासविधानादित्यर्थः । इतश्च नैकफलकामस्य ज्ञानकर्मणोरधिकारः प्रतिपत्तव्य इत्याह—**उभयोरिति** । को मोहः कः शोक एकत्वमनुपश्यत इति सनिदानानर्थप्रहाणं ज्ञानफलं वक्ष्यति । संसारमण्डलान्तर्गतमेव च देशान्तरप्राप्त्यायत्तं हिरण्यगर्भपदप्राप्त्यादिलक्षणं कर्मफलं वक्ष्यति । अग्ने नय सुपथेत्यन्तेनेत्यर्थः । नारायणोपनिषद्वाक्यमपि भिन्नाधिकारित्वे प्रमाणयति—**इमौ द्वावेवेति** ।

---

१. अत्र कुर्वन्नेव जिजीविषेदिति न विधिः, जीवनेच्छायाः रागप्राप्तत्वात् अपि तु यदि जिजीविषेत् तदा कुर्वन्नेव जिजीविषेदिति इच्छामनूद्य कर्मकरणं विधीयते । पूर्वमन्त्रस्य तु मा गृध इति इच्छानिषेधात् संन्यासिविषयत्वम् । अस्य तु इच्छानुवादात् गृहस्थविषयत्वं च स्पष्टमेव । ततो मन्त्रयोर्भिन्नविषयत्वात् ब्रह्मविद एव कर्मविधिरिति न युक्तम् ।

'स्तुतयेऽनुमतिर्वा' (३-४-१४) इति ब्रह्मसूत्रे तु यद्यप्यत्र प्रकरणसामर्थ्यात् विद्वानेव कुर्वन्नित्यभिसम्बध्यते तथापि विद्यास्तुतये कर्मानुज्ञानमेतदित्युक्तम् । तावता न ज्ञानकर्मसमुच्चयः सिद्धयेत् ।

२. विशिष्टरूपभेदः गृहस्थत्वसंन्यासित्वविशिष्टयोर्भेदः ।

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः । ताँस्ते प्रेत्याभिगच्छन्ति ये के चाऽऽत्महनो जनाः ॥३॥
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

संन्यासपथ एवातिरेचयति। "न्यास एवात्यरेचयदि"ति च तैत्तिरीयके। "द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च विभावितः" इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागं चानयोर्दर्शयिष्यामः ॥ २ ॥

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते—असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम। नामशब्दोऽनर्थको निपातः। ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि। अन्धेनादर्शनात्मकेनाज्ञानेन तमसाऽऽवृता आच्छादितास्तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति यथाकर्म यथाश्रुतम्। ये के चाऽऽत्महनः। आत्मानं घ्नन्तीत्यात्महनः[1]। के ते जनाः? येऽविद्वांसः। कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्याऽऽत्मनस्तिरस्करणात्। विद्यमानस्याऽऽत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना आत्महन उच्यन्ते। तेन ह्यात्महननदोषेण संसरन्ति ते ॥ ३ ॥

यस्याऽऽत्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते नाऽऽत्महनः। तत्कीदृशमात्मतत्त्वमित्युच्यते—अनेजदिति। अनेजत्, न—एजत्। एजृ कम्पने। कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु। मनसः सङ्कल्पादिलक्षणाज्जवीयो जववत्तरम्। कथं विरुद्धमुच्यते ध्रुवं निश्चलमिदं मनसो जवीय इति च? नैष दोषः। निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र निरुपाधिकेन स्वेन रूपेणोच्यतेऽनेजदेकमिति। मनसोऽन्तःकरणस्य सङ्कल्पविकल्पलक्षणस्योपाधेरनुवर्तनादिह देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं सङ्कल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन्मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवाऽऽत्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह—नैनद्देवा द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं पुरस्तात्सृष्टिकालेऽनुनिष्क्रान्ततरौ भूतसृष्टिमनुप्रवृत्तौ भिन्नाधिकारित्वाद्द्वयोः संन्यास एवातिरिक्तः श्रेष्ठो भवति परमपुरुषार्थाव्यवधानादित्यर्थः। व्यासवाक्यमपि सम्वादकमाह—**द्वाविमाविति** ॥ २ ॥

आद्यमन्त्रार्थं प्रपञ्चयितुं प्रथममविद्वन्निन्दा क्रियत इत्याह—**अथेति**। ते लोका इति तच्छब्दो यच्छब्दार्थे। **यथाश्रुतमिति**। येन यादृशं प्रतिषिद्धं विहितं वा देवतादिज्ञानमनुष्ठितं स तदनुरूपामेव योनिमाप्नोतीत्यर्थः। आत्महन्तृत्वस्योदरभेदिनि प्रसिद्धेः कथमविद्वांस आत्महन इत्याह—**कथं त इति**। उदरभेदिनोऽध्यात्माधिकारे प्रसङ्गाभावादशुद्धत्वाध्यासेन तिरस्कार एवाऽऽत्महन्तृत्वमित्याह—**अविद्यादोषेणेति**। यथा कस्यचिच्छुद्धस्य मिथ्याभिशापोऽशस्त्रवध उच्यते तद्वदात्मनि पापित्वाद्यध्यासोऽपि हिंसैवेत्यर्थः। अजरामरत्वादिलक्षणोऽहमिति सम्वेदनमभिधानं च यत्कार्यं तद्धतस्येव न दृश्यत इति हननमुपचर्यत इत्याह—**विद्यमानस्येति**। अस्याऽऽत्मघातस्य प्रायश्चित्तविधानादर्शनात्संसरणमेव फलमित्याह—**तेन हीति** ॥ ३ ॥

उत्तरमन्त्रमवतारयति—**यस्याऽऽत्मन इत्यादिना**। अविक्रियमेकं चेदात्मतत्त्वं कथं तर्हि केचन स्वर्गगामिनः केचन नरकगामिन इति सांसारिकव्यवस्था स्यादिति चेन्मनउपाधिनिबन्धनेत्यभिप्रेत्याऽऽह—**मनस इत्यादिना**। उपाधेरनुवर्तनात् विक्रियादिव्यवहाराश्रयत्वमिति शेषः। ननु मनसो देहान्तःस्थत्वाद्बहिर्गमनायोग्यत्वात्कथं वेगवत्त्वमित्याशङ्क्याह—**देहस्थस्येति**। जवीयस्त्वादश्वादिवत्तर्हि चक्षुरादिग्राह्यत्वं प्राप्तमित्याशङ्क्याऽऽह—**नैनद्देवा इति**। चक्षुरादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वात्तदविषयत्वे चक्षुरादिविषयत्वमप्यात्मनो न सम्भवतीत्यर्थः।

---

१. आत्महनः = आत्मनि पापित्वाद्यध्यासवन्तः तादृशाध्यासोऽपि हननमेव।

यद्वा भगवद्गीताभाष्ये 'न हिनस्त्यात्मनात्मानं' इत्यत्र सर्वोहि अत्यन्तप्रसिद्धं साक्षादपरोक्षादात्मानं तिरस्कृत्य अनात्मानमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वा उपात्तमात्मानं हत्वा अन्यमात्मानमुपादत्ते नवं, एवं तमपि हत्वा अन्यमित्येवं उपात्तमुपात्तमात्मानं हन्तीति आत्महा सर्वोऽज्ञः यस्तु परमार्थात्मा असावपि सर्वदा अविद्यया इत इव विद्यमानफलाभावात् इति सर्वे अविद्वांसः आत्महनः इति द्रष्टव्यम्।

तदेजति तन्नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥
यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चाऽऽत्मानं ततो न विजुगुप्सते ॥ ६ ॥

नाऽऽप्नुवन्न प्राप्तवन्तः। तेभ्योमनो जवीयो मनोव्यापारस्य व्यवहितत्वात् आभासमात्रमप्यात्मनोनैवदेवानां विषयीभवति। यस्माज्जवनान्मनसोऽपि पूर्वमर्षत्पूर्वमेव गतम् । व्योमवद्व्यापित्वात् । सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतोवाविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह—तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागिन्द्रियप्रभृतीनत्येत्यतीत्य गच्छतीव । इवार्थं स्वयमेव दर्शयति—तिष्ठदिति । स्वयमविक्रियमेव सदित्यर्थः । तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत्क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा । अपः कर्माणि प्राणिनां चेष्टालक्षणानि । अन्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाग्निवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः । धारयतीति वा । "भीषाऽस्माद्वातः पवत" इत्यादिश्रुतिभ्यः । सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥ ४ ॥

न मन्त्रणां [1]जामिताऽस्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह—[2]तदेजतीति । तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति तदेव च नैजति स्वतो नैव चलति स्वतोऽचलमेव सच्चलतीवेत्यर्थः । किञ्च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव । तत्, उ अन्तिक इति च्छेदः । तद्वन्तिके समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च । तदन्तरभ्यन्तरेऽस्य सर्वस्य । "य आत्मा सर्वान्तर" इति श्रुतेः । अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्यास्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वादन्तः । प्रज्ञानघन एवेति च शासनान्निरन्तरं च ॥५॥

यस्तु[3] । यः परिव्राड्मुमुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तान्यात्म[4]न्येवानुपश्यत्यात्मव्यतिरिक्तानि न

मनसो वा कथं न विषय आत्मेत्यत आह—यस्मादिति । यथा मनःस्थं परिमाणं मनसो न विषयोऽत्यन्ताव्यवधानात्तथाऽऽत्माऽप्यन्ताव्यवधानान्मनसो न विषयस्तद्व्यापकत्वाच्चेत्यर्थः । उक्तात्मसम्भावनायोपपत्तिमाह—तस्मिन्नात्मतत्त्वे सतीति । श्रौतानि कर्माणि सोमाज्यपयः प्रभृतिभिरद्भिः सम्पाद्यन्त इति सम्बन्धाल्लाक्षणिकोऽप्शब्दः कर्मसु प्राणचेष्टायाश्चाब्निमित्तत्वप्रसिद्धेः; कारणवाचकः शब्दः कार्ये लक्षणया प्रयुक्त इत्यर्थः । ईश्वरस्यापि हिरण्यगर्भस्य नियतप्रवृत्त्यन्यथानुपपत्त्याऽधिष्ठाता परमेश्वरः सम्भाव्यत इत्युक्तमिदानीं मातरिश्वग्रहणमुपलक्षणार्थमादाय तात्पर्यमाह—सर्वा हीति ॥ ४ ॥

जामिता—आलस्यम् । व्यापित्वाद्ब्राह्मतोऽस्ति निरतिशयसूक्ष्मत्वादन्तश्चेदस्ति तर्हि निरन्तरमेकरसं न स्यान्मानाभावादित्याशङ्क्याऽऽह—प्रज्ञानघन एवेति ॥ ५ ॥

उक्तात्मज्ञानस्य फलं विधिनिषेधातीतजीवन्मुक्तस्वरूपेणावस्थानमित्याह—यस्त्विति ॥ ६ ॥

---

१. जामिता—जामितापदं इत्थं परिमले विवृतम्—सोदर्यवाची जामिताशब्दः तस्य सादृश्ये लक्षणेत्यभिप्रेत्य शाबरभाष्ये सादृश्यमिति व्याख्यातः एकरूपायाः क्रियायाः पुनः पुनरनुष्ठाने तन्द्रा स्यादिति तस्य दोषत्वपर्यवसानं आलस्यमित्युक्त्या सूचितम् (प० १–१–४)

२. माध्वास्तु—तत् प्रपञ्चः एजति बिभेति । तत् ब्रह्म न एजति न बिभेति स्वतन्त्रत्वादिति व्याचख्युः । तन्न । 'तद्दूरे तद्वन्तिके' इत्यत्रैव एकस्यैव तत्पदाभ्यां ग्रहणं स्वरसम् । तत्परित्यागदोषः अत्र ।

३. अत्र आत्मा स्वात्मैव न तु परमात्मा सर्वभूतेषु च अहमेवात्मा । अतो द्वितीयाभावात् न स्वात्मानमन्यतः गोपायितुमिच्छेत् । माध्वास्तु—आत्मा परमात्मैव ततो न विजुगुप्सते स्वात्मानं जीवं न गोपायितुमिच्छेदित्यर्थः, इत्याहुः, जीवाद्व्यतिरिक्तस्य परमात्मनः सत्वे ततो भयं भवत्येव 'द्वितीयाद्वै भयं भवति' 'भीषास्माद्वातः पवत' इत्याद्युक्तेः । न च वाते प्राणदेवे सर्वज्ञे भयनिमग्ने सति अस्माकं भयाभावः । अतः सर्वभूतेषु परमात्मानमन्तर्यामित्या पश्यतीति नार्थः ।

४. आत्मन्येवानुपश्यति इत्युक्ते उपादानादन्यत्र कार्याभावात् आत्मा उपादानं लभ्यते तेन चात्मव्यतिरेकेण प्रपञ्चाभावः सूचितः ।

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक [१]एकत्वमनुपश्यतः ॥ ७ ॥
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः [२]स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः॥ ८ ॥

पश्यतीत्यर्थः। [३]सर्वभूतेषु च तेष्वेव चाऽऽत्मानं तेषामपि भूतानां स्वमात्मानमात्मत्वेन, यथाऽस्य देहस्य कार्यकरण-
५ **सङ्घातस्याऽऽत्माहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमे-वाऽऽत्मेति सर्वभूतेषु चाऽऽत्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति। प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणाऽऽत्मनोऽन्यद्दुष्टं पश्यतो भवत्यात्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव ततो न विजुगुप्सत इति ॥ ६ ॥**

इममेवार्थमन्योऽपि मन्त्र आह—यस्मिन्सर्वाणि भूतानि[४]। यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि
१० सर्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव संवृत्तः परमार्थवस्तु विजानतस्तत्र तस्मिन्काले तत्राऽऽत्मनि[५] वा को मोहः कः शोकः। **शोकश्च मोहश्च कामकर्मबीजमजानतो भवति न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः। को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासम्भवप्रदर्शनात्सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७ ॥**

योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याहायं मन्त्रः—स[६] पर्यगात्स यथोक्त आत्मा

१५ निरतिशयानन्दस्वरूपमत्त एव दुःखास्पृष्टमात्मानमजानतः शोको भवति हा हतोऽहं न मे पुत्रोऽस्ति न मे क्षेत्रमिति। ततः पुत्रादीन्कामयते तदर्थं देवताराधनादि चिकीर्षति न त्वात्मैकत्वं पश्यतस्ततोऽन्वयव्यतिरेकाभ्यां शोकादेरविद्याकार्यत्वावधारणान्मूलाविद्यानिवृत्त्यैव शोकादेरात्यन्तिकी निवृत्तिर्विद्याफलत्वेन विवक्षिता लय-मात्रस्य सुषुप्तेऽपि भावादित्याह—**शोकश्च मोहश्चेत्यादिना** ॥ ७ ॥

---

१. एकत्वं—परमात्माभेदं यद्वा मूलाज्ञाननिरासेन विशुद्धस्वात्मैक्यं—सायणः।
२० २. स्वयंभूः स्वयमेव भवति न तत्सत्तापादकमन्यदपेक्षितम्। अनन्याधीनसत्ताकं—सायणः।
३. सर्वभूतेषु चात्मानं कारणत्वेनानुस्यूतं पश्यति इति सायणः।
४. अत्र एवकारेणात्मव्यतिरेकेणाभाव उच्यते। स एव एकत्वमनुपश्यत इत्यनूद्यते। एकत्वज्ञानफलं शोक-मोहनिवृत्तिश्च तत्र को मोह इत्यनेनोच्यते। इदं च 'तरति शोकमात्मवित्' इत्यादिश्रुतिसिद्धमेव। विशिष्टाद्वैतिनः—आत्मपदं परमात्मपरं, एकत्वं च विभागानर्हसम्बन्धः न त्वभेद इत्यूचुः। तत्र
२५ सम्बन्धसत्त्वेऽपि भेदसद्भावात् द्वितीयाद्वै भयं इत्युक्तेर्न पूर्णमोक्षप्राप्तिः सिद्ध्येत्।
५. अत्र कल्पतरुः—यः सर्वात्मभावो विद्याभिव्यक्त उक्तः तत्रात्मनि। तत्र वा ज्ञानकाले आत्मैकत्वं पश्यतः को मोहः। (१-१-४)
६. स पर्यगात्—मतान्तरयोः अकायं कर्मकृतशरीररहितमित्यर्थः कृतः। परमात्मनः शरीरमित्युक्ते स्वरूप-मेव। न त्वस्मदादिवत् चक्षुरादिविशिष्टमसर्वज्ञत्वापातात्। तच्छरीरेऽभिमानसत्त्वे भगवतो भ्रमापाताच्च,
३० अतो लीलाविग्रहसद्भावेऽपि स्वतः शरीरसामान्याभाववानिति ऋजुः पन्थाः। शीर्यत इति शरीरम्। न हि भगवच्छरीरस्य क्षयोऽस्ति। 'अशरीरमकायं पश्यत्यचक्षुरि'त्यादिश्रुतिश्च यथार्था।

पर्यगात्–ब्रह्मवित् परमात्मानं स्वानुभवगोचरत्वेन प्राप्नुयादित्यर्थः रामानुजीये। नहीदं ब्रह्मविदः फलोक्तिप्रकरणं फलं तु ततो न विजुगुप्सते तत्र को मोहः इत्यनेनोक्तमेव। स इति च पूर्वप्रकृतप्रधान-ब्रह्मपरामर्शी न तु जीवपरामर्शी। यत्तु शुक्रमित्यादीनि शुद्धजीवपराणीति। शुद्धस्य ब्रह्माभेदात् तं
३५ स्वाच्छरीरात्प्रवृहेत् तं विद्याच्छुक्रममृतमिति काठकोक्तेः। माध्वमते–शुक्रं शोकरहितमित्यर्थः इत्युक्तम्, तन्न; शुक्रं शुचेर्व्वलतिकर्मणः इति निरुक्तम्। शुद्धं ज्योतिष्मदिति रूढ्यर्थसम्भवे शोकं रहति त्यजतीति व्युत्पत्त्या शोकरहितमित्यर्थोऽयुक्तः शुक्रहमितिरूपापत्तेश्च।

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्यायाꣳरताः ॥ ९ ॥

पर्यगात्परि[1] **समन्तादगाद्गतवानाकाशवद्व्यापीत्यर्थः शुक्रं शुक्रं ज्योतिष्मद्दीप्तिमानित्यर्थः** । अकायमशरीरो लिङ्ग-**शरीरवर्जित इत्यर्थः** । अव्रणमक्षतम् । अस्नाविरं **स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम्** । **अव्रणमस्ना-विरमित्याभ्यां स्थूलशरीरप्रतिषेधः** । शुद्धं **निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः** । अपापविद्धं **धर्मा-धर्मादिपापवर्जितम्** । शुक्रमित्यादीनि वचांसि **पुंलिङ्गत्वेन परिणेयानि स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना** ५ **पुंलिङ्गत्वेनोपसंहारात्** । कविः **क्रान्तदर्शी सर्वदृक्** । **नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः** । मनीषी **मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः** । परिभूः **सर्वेषां पर्युपरि भवतीति परभूः** । स्वयंभूः **स्वयमेव भवतीति** । **येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयंभूः** । **स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथा भावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनलोऽर्थान्कर्तव्यपदार्थान्व्यदधाद्विहितवान्यथानुरूपं व्यभजदित्यर्थः** । **शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्यः इत्यर्थः** ॥ ८ ॥ १०

अत्राऽऽद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः । **ईशावास्यमिदं सर्वं मा गृधः कस्य-स्विद्धनमिति । अज्ञानां जिजीविषूणां ज्ञाननिष्ठाऽसम्भवे कुर्वन्नेवेह कर्माणि जिजीविषेदिति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः** । **अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः, 'सोऽकामयत जाया मे स्यादि'त्यादिना अज्ञस्य कामिनः कर्माणीति, 'मन एवास्याऽऽत्मा वाग्जाये'त्यादिवचनात् अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमव-गम्यते** । **तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनाऽऽत्मस्वरूपावस्थानम्** । **जायाद्येषणात्रयसंन्यासेन चाऽऽत्मविदां** १५ **कर्मनिष्ठाप्रातिकूल्येनाऽऽत्मस्वरूपनिष्ठैव दर्शिता 'किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक' इत्यादिना** । **ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम त इत्यादिनाऽविद्वन्निन्दाद्वारेणाऽऽत्मनो याथात्म्यं स पर्यगादित्येतदन्तै-र्मन्त्रैरुपदिष्टम्** । **ते ह्यत्राधिकृता न कामिन इति** । **तथा च श्वेताश्वतराणां मन्त्रोपनिषदि "अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टमि"त्यादि विभज्योक्तम्** । **ये तु कर्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते**—अन्धं तम इत्यादि । **कथं पुनरेवमवगम्यते न तु सर्वेषामिति? उच्यते**—**अकामिनः साध्यसाधनभेदोपमर्देन** २० **"यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः** । **तत्र को मोहः कः शोक एकत्वमनुपश्यत"** इति **यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति** । **इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते** । तत्र च

योऽयमिति । 'स्नु' प्रक्षरणे धातुः । स्नावयन्ति शरीरमिति स्नावाः शिराः । क्रान्तमतिक्रान्तं नष्टमित्युप-लक्षणं भूतभविष्यद्वर्तमानदर्शी ॥ ८ ॥

प्रकरणविभागं दिदर्शयिषुर्वृत्तमनुवदति—**अत्राऽऽद्येनेति** । यदुक्तं **भास्करेण** सर्वाऽप्युपनिषदेकं ब्रह्मविद्या- २५ प्रकरणं ततः प्रकरणभेदकरणमनुचितमिति । तदसत् । प्राणाद्युपासनविधानस्याप्युपनिषत्सु दर्शनात् । न च तदपि ब्रह्मज्ञानाङ्गमिति वाच्यम् । पृथक्फलश्रवणात् । तेनापि व्याकृताव्याकृतोपासनसमुच्चयविधानस्य प्रकरणभेदे-नैवेष्टत्वाद्व्याकृताव्याकृतोपासनस्य प्रकारान्तरत्वात्तस्माद्यथा कर्मकाण्डेऽग्निहोत्रादिप्रकरणं भिन्नमेवेष्यते भिन्नाधि-कारत्वात्तत्तत्कर्मणस्तथोपनिषत्स्वपि भिन्नाधिकारत्वात्कर्माविरुद्धतद्विरुद्धविद्याप्रकरणभेदो न विरुध्यते । मन्त्रार्थे ब्राह्मणसम्मतिं दर्शयितुमुपक्रमते—**अनयोश्चेत्यादिना** । तत्र वाक्ये कथमज्ञत्वमवगम्यत इत्याशङ्क्याऽऽह—**मन** ३० **एवेति** । 'जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीये'ति कामयमानस्य सर्वथैव बाह्यो जायादिर्यदा न सम्पद्यते तदाऽध्यात्मं जायादिसम्पत्तिं दर्शयति । एतच्चाज्ञत्वलिङ्गं मनआदिष्वात्मत्वाद्यभिमानस्याज्ञानकार्य-त्वात् । यथा च बाह्यकामिन्यलाभे सुप्तो मनोविजृम्भितकामिनीमुपभुञ्जानोऽज्ञः प्रसिद्धस्तद्वदयमपीत्यर्थः । तेषां च कर्मणां फलं संसारातिरेक्येवेत्यपि तत्रैव दर्शितमित्याह—**तथा चेति** । एकं साधारणमन्नं यदिदमद्यते द्वे देवानां हुतप्रहुते दर्शपूर्णमासौ वा; त्रीण्यस्य भोगसाधनानि मनोवाक्प्राणलक्षणानि; पञ्चार्थमेकं तत्पय इति सप्तान्नसर्गो ३५

---

१. स आत्मा परितः समन्तात् अगात् सर्वगतः शुक्रमित्यादयः शब्दाः पुंलिङ्गत्वेन परिणेयाः स इत्युप-क्रमात् । अकायः लिङ्गशरीरवर्जितः, अव्रणः अक्षतः, अस्नाविरः शिरारहितः आभ्यां स्थूलदेहराहित्य-मुक्तम् । शुक्रः बाह्याशुद्धिविरहितः । शुद्धे इति आन्तररागाद्यभावः । अपापविद्धः धर्माधर्मरहितः । (कल्प-१.१.१४)

[1]अन्यदेवाऽऽहुर्विद्ययाऽन्यदाहुरविद्यया । इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

यस्य येन समुच्चयः सम्भवति न्यायतः शास्त्रतो वा तदिहोच्यते । यद्वैवं वित्तं देवताविषयं ज्ञानं कर्मसम्बन्धित्वेनोपन्यस्तं न परमात्मज्ञानम् । 'विद्यया देवलोक' इति पृथक्फलश्रवणात् । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चित्सयेषया न निन्दापरैवैकैकस्य पृथक्फलश्रवणात् । 'विद्यया तदारोहन्ति' । 'विद्यया देवलोकः' । 'न तत्र दक्षिणा यन्ति' । 'कर्मणा पितृलोक' इति । नहि शास्त्रविहितं किञ्चिदकर्तव्यतामियात् । तत्रान्धं तमोऽदर्शनात्मकं तमः प्रविशन्ति । के । येऽविद्यां विद्याया अन्याऽविद्या तां कर्मेत्यर्थः । कर्मणो विद्याविरोधित्वात् । तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति । के कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः ॥ ९ ॥

तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह । अन्यथा फलवदफलवतोः सन्निहितयोरङ्गाङ्गित्वमेव स्यादित्यर्थः । अन्यदेवेत्यादि । अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति "विद्यया देवलोको" "विद्यया तदारोहन्ती"ति श्रुतेः । अन्यदाहुरविद्यया कर्मणा क्रियते "कर्मणा पितृलोक" इति श्रुतेः । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम् । य आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥ १० ॥

दर्शितः श्रुत्या यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेत्यादिना । अत्रैकैको यजमान एव विहितप्रतिषिद्धज्ञानकर्मानुष्ठानात्सर्वस्य संसारस्य साक्षात्पारम्पर्याभ्यां जनकत्वात्पितोच्यते । तेषु च सृष्टेष्वन्नेषु तस्य पितुरहमिदं ममेदमित्यात्मत्वाध्यासेन मनआदिष्वितरेषु च सम्बन्धाध्यासेनावस्थानं संसारः प्रसिद्ध इत्यर्थः ।

एवं मन्त्रप्रदर्शिते निष्ठाद्वये ब्राह्मणसम्मतिं दर्शयित्वा प्रकरणविभागं दर्शयति—**ये तु ज्ञाननिष्ठा इत्यादिना । अत्याश्रमिभ्य इति** । उत्तमाश्रमिभ्य इत्यर्थः । साध्यसाधनभेदोपमर्देन यदात्मैकत्वविज्ञानं यस्मिन्सर्वाणि भूतान्यात्मैवाभूदित्यवधारणेनोक्तं पूर्वार्धेन, उत्तरार्धेन च संसारनिवृत्तिफलकमुक्तं तन्न श्रौतेन स्मार्तेन वा कर्मणा केनचिदमूढः समुच्चित्सयेषति । अन्धं तम इत्यादौ तु समुच्चित्सयेषयाऽविद्वदादिनिन्दा दृश्यते । ततः किमित्यत आह—**तत्र च यस्येति** । कस्य तर्हि ज्ञानस्य कर्मसमुच्चयः सम्भवतीत्यत आह—**यद्वैवं वित्तमिति** ।

यच्चोक्तं भास्करेणेशा वास्यमिति मन्त्रे ब्रह्मविद्यायाः प्रक्रान्तत्वात्तस्या एव समुच्चित्सयेषया निन्दोच्यत इति । तदसत् । न हि प्रकृतमित्येतावता सम्बध्यते किं तु सम्बन्धयोग्यम् । शुद्धब्रह्मात्मैकत्वविद्यायास्तु कर्तृत्वाद्यध्यासोपमर्दकत्वान्नास्ति कर्मसम्बन्धयोग्यता । किञ्च यस्मिन्निष्पन्नेऽपि फलस्य व्यवधानं सम्भाव्यते तस्यैव सहकारिसमुच्चय इष्यते दर्शादेः, इह त्वेकत्वमनुपश्यतः को मोहः कः शोक इत्येकत्वदर्शनसमकालमेव मोहादिनिवृत्त्यभिधानान्न कालान्तरीयफलम् । ततो न सहकारिसमुच्चित्सयेषा । किञ्चास्या मन्त्रोपनिषदो ब्राह्मणे "ब्राह्मणा विविदिषन्ति यज्ञेने"त्यादौ तृतीयाश्रुत्या यज्ञादेरिष्यमाणवेदने करणत्वेन सम्बन्धः प्रतीयते । तत्कथं दुर्बलेन प्रकरणेन सहकारितया सम्बन्धः प्रकल्प्यते । प्रधानस्य च विद्यायाः सहकारिसम्बन्धविधित्सया निन्देत्यप्ययुक्तम् । अत एव चाग्नीन्धनाद्यनपेक्षेतिसूत्रविरोधश्च । समुच्चयश्च परैरपि नेष्यते । विरोधेन च परिजह्रे । तस्मात्कर्मविरुद्धदेवताज्ञानस्यैवात्र समुच्चयो विधित्स्यते । ननु देवताज्ञानस्य कर्मफलातिरिक्तफलाभावात्समुच्चयो न सम्भवतीत्यत आह—**विद्ययेति** । ननु समुच्चित्सयेषया निन्देति किमिति व्याख्यायते । अध्ययनविधेर्मोक्षादर्वाक्पर्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभासत्वात्प्रहाणार्थैव निन्दा किं नेष्यते तत्राऽऽह—**तयोर्ज्ञानकर्मणोरिति** । न फलशब्दो मोक्षे रूढो मोक्षमनिच्छतामपि समीहिते फलव्यवहारदर्शनात्ततो यो देवलोकादिमुकपादित्सते तस्य तदपि फलं भवत्येवेत्यर्थः ॥ ९-१०-११ ॥

---

१. ननु ज्ञानकर्मणोः पृथगनुष्ठानप्रसक्तिरेव नास्ति इति पृथगनुष्ठानं किमर्थं निन्द्यते अत आह—अन्यदेवेति। पृथक् फलश्रवणात् पृथगनुष्ठेयत्वं प्रसक्तमेव—सायणः ।

माध्वास्तु—यथावज्ज्ञानस्येव अन्यथाज्ञाननिन्दनस्यावश्यकर्तव्यत्वोपपादनाय अन्यथाज्ञानस्यासुर्यलोकप्राप्तिसाधनत्वमनूद्य अन्यथाज्ञानानिन्दनस्य ततोऽधिकानर्थहेतुत्वमाह—अन्धं तम इति । तन्न । न नापं पापिनं ब्रूयादित्यादिशास्त्रविरोधात् । मिथ्याज्ञानं परिहर्तव्यमित्यनेनैवानिष्टनिवृत्तिसम्भवे तन्निन्दाविधानं व्यर्थमेव । विद्यां चाविद्यां चेत्यत्र अपरविद्याकर्मणोः समुच्चयो भाष्ये उक्तः ।

विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥
अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते । ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ १२ ॥

यत एवमतो [1]विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः यस्तदेतदुभयं सहैकेन पुरुषेणानुष्ठेयं वेद तस्यैवं समुच्चयकारिण एवैकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते—अविद्यया कर्मणाऽग्निहोत्रादिना मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वाऽतिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति । तद्धच- ५
मृतमुच्यते यद्देवतात्मगमनम् ॥ ११ ॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते—अन्धं तमः प्रविशन्ति येऽसम्भूतिं

चित्तन्त्रा माया परमेश्वरस्योपाधिः। "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इत्यादिश्रुत्यन्तरप्रसिद्धाऽत्रा-

---

१. अत्र मतान्तरे—ज्ञानकर्मणोः समुच्चयोऽत्र विधीयत इत्यूचुः । तन्न । विद्या ह्यत्र निर्गुणब्रह्मविद्यैवोक्ता अनेजदेकं, स पर्यगाच्छुक्रमित्यादिना निर्गुणब्रह्मबोधनात् निर्गुणविद्यायाः कर्मसमुच्चयासम्भवात् । १०
यत्तु उपासनरूपविद्या कर्माङ्गत्वेन विधीयत इत्युक्तम्, तन्न, उपासनायाःअङ्गत्वे पृथक् फलोक्त्यनुपपत्तेः अङ्गेषु फलश्रुतेरर्थवादत्वात्, अतः उपासनाकर्मणोः समुच्चयविधानमेवेदम् ।

माध्वास्तु—अविद्या मिथ्याज्ञानस्य निन्दा साऽपि मोक्षप्राप्तये कर्तव्या । तयाऽनिष्टनिवृत्तिः । इदमपि चिन्त्यम् । मिथ्याज्ञानं परिहर्तव्यमित्यनेनैवनिष्टनिवृत्तिसम्भवे तन्निन्दाविधानं व्यर्थमेव ।
माण्डूक्यकारिकाभाष्ये तथा ऐतरेयभाष्ये च विद्यापदेन मुख्या ब्रह्मविद्यैव परिगृहीता । विद्याऽविद्ययोः १५
ज्ञानकर्मणोः समुच्चयस्तु क्रमेणैकपुरुषवृत्तित्वात् न तु एककालिकसमुच्चयः विरोधात् । ऐतरेयकेऽयं विशेषः यत् तपआदि गुरूपासनादि च विद्योत्पत्तिसाधनं कर्म अविद्यापदेनोच्यत इति । अत्रापि समुच्चयः क्रमिक एव ।
लोकमान्यतिलकस्तु—स्वीये गीतारहस्ये विद्यां चाविद्याञ्चेति शुद्धब्रह्मविद्यैव ग्राह्या नतूपासनं शङ्कराचार्योक्तं युक्तम् । शङ्कराचार्याः विद्यापदं ब्रह्मविद्यापरमिति जानन्तोऽपि ज्ञानकर्मसमुच्चयं विरुद्धं २०
मन्यन्ते । वयं तु श्रुतीनामेकार्थत्वं न मन्यामहे । मोक्षं प्रति बहव उपाया बहुभिर्महर्षिभिस्तत्तदुपनिषत्सु विहिताः । तेषामेकवाक्यत्वं नावश्यकम् । अतो ज्ञानकर्मसमुच्चय एवास्या उपनिषदस्तात्पर्यम् । उव्वटभाष्ये अनन्ताचार्यभाष्ये च विद्यापदं ब्रह्मविद्यापरमित्युक्तम्, इत्याहुः । तन्न । भगवत्पादैरपि विद्यापदेन ब्रह्मविद्योक्तेति माण्डूक्यैतरेयकभाष्ययोः प्रदर्शनात् । समुच्चयश्च क्रमसमुच्चय इत्येवमेव उव्वटानन्ताचार्याभ्यां लिखितम् । उपनिषदां भिन्नवाक्यत्वं तु नानुमन्यामहे । "सर्वे वेदा यत्पदमा- २५
मनन्ति" "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" इति श्रुतिसूत्राभ्यामेकवाक्यत्वनिरूपणात् ।

उपासनापरतया अत्र व्याख्यानं तु ज्ञानकर्मणोः सहशब्दोक्तस्य एककालीनसमुच्चयस्यासम्भवादेव कृतं; उत्तरत्र श्रुतमार्गयाचनस्य सगुणोपासन एव सम्भवाच्च । निर्गुणविद्याया उत्क्रान्ति विनाऽत्रैव मुक्तिसाधनत्वात् मुक्तेर्मार्गयाचनस्य सन्दर्भविरोधाच्च । अतः सगुणोपासनपरतया व्याख्यानं युक्तमेव । अपि च सहशब्दोऽत्र क्रमसमुच्चयपर एव । यत उत्तरत्र अविद्यया कर्मणा मृत्युं तीर्त्वा तदुत्तरकाल एव ३०
विद्ययाऽमृतत्वप्राप्तिश्रवणं तथैव सङ्गच्छते । अपि च मा गृध इति ज्ञानिनः इच्छानिषेधः, जिजीविषेत् इति कर्मिणः इच्छानुवादश्च समकाले ज्ञानकर्मणोः समुच्चयाभावमेव सूचयतः ।

आर्यसमाजीये दयानन्दभाष्ये—अविद्या अशुद्धे शुद्ध इति अनात्मनि शरीरे आत्मेति बुद्धिश्च । विद्या तु ये सत्यभाषणन्यायाचरणरूपधर्मरहिताः अभिमानारूढाः संस्कृतभाषाभिज्ञाः केवलं शब्दार्थज्ञानवन्तः तेषां ज्ञानं इति अन्धं तम इत्यादिमन्त्रं व्याख्याय विद्यां चाविद्यां चोभयं सहेति मन्त्रे अन्याद्दशे ३५
विद्याविद्ये प्रदर्शिते । तत्तु प्रक्रमोक्ते विद्याविद्यापरत्वे सम्भवति, अन्याद्दशयोस्तयोः परिग्रहे कारणा-
भावादयुक्तम् ।

अन्यदेवाऽहुः सम्भवादन्यदाहुरसम्भवात्। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥
सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह। विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ १४ ॥

सम्भवनं सम्भूतिः सा यस्य कार्यस्य सा सम्भूतिस्तस्या अन्या असम्भूतिः प्रकृतिः कारणमविद्याऽव्याकृताख्या तामसम्भूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति। ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति य उ सम्भूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः ॥ १२ ॥

अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह—अन्यदेवेति। अन्यदेव पृथगेवाऽऽहुः फलं सम्भवात्सम्भूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः। तथा चान्यदाहुरसम्भवादसम्भूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तमन्धं तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यते। इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

यत एवमतः समुच्चयः सम्भूत्यसम्भूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह—सम्भूतिं[1] च विनाशं च यस्तद्वेदोभयꣳ सह। विनाशेन विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणाऽभेदेनोच्यते विनाश इति। तेन सम्भूतिशब्देनोच्यते न ब्रह्म। तस्य निर्विकारस्य साक्षात्प्रकृतित्वानुपपत्तेः। भास्कराभिमतस्तु परिणाम-

---

१. अत्र व्याकृताव्याकृतोपासनयोः समुच्चयो विधित्सितः। माध्यन्दिनपाठे आदौ अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासते इति मन्त्रत्रयं पठित्वा तदनन्तरं अन्धं तमः प्रविशन्ति येऽविद्यामुपासते इत्यादिमन्त्राः पठिताः, तदनुसारेण माण्डूक्यकारिका तद्भाष्यं च प्रवृत्ते। तत्र च सम्भूतिरित्येव पदच्छेदो नाकारप्रश्लेषः, ततश्चायमर्थः—सम्भूतिर्नाम देवतोपासनं विनाशः कर्म तयोः समुच्चयविधानार्थमेकैकनिन्दा। कर्म वैदिकं स्वाभाविकाज्ञानप्रवृत्तिरूपमृत्योरतितरणार्थम्। देवतादर्शनरूपसम्भूतिः फलरागप्रवृत्तिरूपसाध्यसाधनैषणाद्वयतरणार्था। एवमुभयविधमृत्योरतिक्रान्तो विरक्त उपनिषच्छास्त्रार्थालोचनक्षमः। विद्यां ब्रह्मविद्यां प्राप्नोति। तदुक्तं भाष्ये—पूर्वभाविनीमविद्यामवेक्ष्य पश्चाद्भाविनी ब्रह्मविद्या अमृतत्वसाधना एकेन पुरुषेण क्रमेण समुच्चीयमाना अविद्यया समुच्चीयत इत्युच्यत इति। अतोऽमृतत्वसाधनब्रह्मविद्यामपेक्ष्य निन्दार्थः सम्भूत्यपवादः। भामत्यां तु—समन्वयाधिकरणान्ते वृत्तिरूपसाक्षात्कारः अविद्या सा मृत्युं नाशयति तया मृत्युं तीर्त्वा विद्यारूपब्रह्मोपलक्षितं अमृतमश्नुते। विद्यां चाविद्यां चेति साधनफलयोर्भिन्नकालिकयोः समुच्चय इत्युक्तम्।

यत्तु माध्वव्याख्यानं—ये असम्भूतिमुपासते प्रलयकर्त्रा भगवान् ये सृष्टेरकर्त्तेत्युपासते ते नरकं यान्ति। ये सम्भूत्यां इताः भगवान् सृष्टेरेव कर्त्रा इति ज्ञानवन्तः तेऽपि तमः प्रविशन्ति अतो भगवान् सृष्टिप्रलययोः कर्तेत्युपासनीय इति। तन्न। एवं सति स्थितिकर्तृत्वानुपासनात् पुनः नरकप्राप्तिं को वारयेत्। किञ्च भगवत्तत्त्वज्ञानान्मोक्षप्राप्तिः तत्र तत्राभिहिता विरुध्येत।

यच्च रामानुजीयानां व्याख्यानं—विद्यां चाविद्यां चेति ज्ञानकर्मसमुच्चयविधानम्। तत्र विद्या साक्षाद्भगवत्प्राप्तिसाधनं कर्म च तस्या अङ्गमित्युक्तम्। तन्न। अविद्याशब्दितस्य कर्मण अविद्यया मृत्युं तीर्त्वेति पृथक्फलश्रवणात्, अङ्गानां फलाभावात्। अतः कर्मणां न विद्याङ्गत्वम्। अङ्गत्वे विद्यापदेन साङ्गं पृथक् गृह्येत।

यत्तु सम्भूतिं च विनाशं चेत्यत्र सम्भूतिः ब्रह्मानुभूतिः। विनाशः समाध्यन्तरायाणां विनाश इति; तत्राप्युक्तविनाशस्य समाध्यङ्गत्वात् विनाशेन मृत्युं तीर्त्वेति पृथक्फलकथनमयुक्तम्, अङ्गानां पृथक्फलाभावात्। अपि च येऽसम्भूतिमुपासते समाधिविरुद्धरागद्वेषादिनिवृत्तिमात्रनिष्ठाः ते अन्धं तमः प्रविशन्तीति चित्रं "न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छती"ति भगवद्वचनविरोधात्। ये ब्रह्मसमाधिमात्रनिष्ठास्ते तमः प्राप्नुवन्तीत्यपि न; यान्ति मद्याजिनोऽपि मामित्यनेन विरोधात्। अपि च सम्भूतिं च विनाशं चेत्यत्र सम्भूतिः समाधिरिति व्याख्यानमयुक्तम्, संभूतेरुत्पत्यर्थत्वात्। अपि च विनाशपदेन पूर्वोक्तसम्भूतिपरामर्शो न युक्तः उत्पन्नस्य विनाशित्वनियमात् अनुत्पन्नस्याविनाशित्वात्।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥
पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह ।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥

तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम् । तेनानैश्वर्यादि-मृत्युमतीत्य असम्भूत्याऽव्याकृतोपासनयाऽमृतं प्रकृतिलयलक्षणमश्नुते । सम्भूतिं च विनाशं चेत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात् ॥ १४ ॥

मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगतिः । अतः परं पूर्वोक्तमात्मैवाभू-द्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तम् । तत्र निषेकादिश्मशानान्तं कर्म कुर्वञ्जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया; तदुक्तं "विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृत-मश्नुत" इति तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते—"तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष" एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते हिरण्मयेन पात्रेण । हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत् । तेन पात्रेणेवापिधानभूतेन [1]सत्यस्यैवाऽऽदित्यमण्डलस्थस्य ब्रह्मणोऽपिहितमाच्छादितं मुखं द्वारम् तत्त्वं हे पूषन्नपावृण्वपसारय सत्यधर्माय तव सत्यस्योपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यमथवा यथाभूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये ॥ १५ ॥

वादस्तत्त्वालोके[2] निरस्त एवास्माभिः । सांसारिकदुःखानुभवाभावेन च सुषुप्तिवत्प्रकृतिलयस्य पुरुषेणार्थ्य-मानताऽप्युपपद्यते । फलं च कर्मोपासन इव प्रकृत्युपासनेऽपि परमेश्वर एव दास्यति । ततो जडत्वात्प्रकृतेः फल-दातृत्वानुपपत्तेरुपास्यत्वानुपपत्तिरित्यपि कुचोद्यमेव ॥ १२-१३-१४ ॥

विस्तरेणोक्तमर्थजातं संक्षिप्योपसंहरति—**मानुषदैववित्तसाध्यमित्यादिना** । शरीरपाटवं गोभूहिरण्यादि-साधनसम्पत्तिश्च मानुषं वित्तम् । दैवं वित्तं देवताज्ञानम् । उत्तरग्रन्थस्य सम्बन्धाभिधित्सयाऽर्थविशेषमनुवदति—**तत्र निषेकादीत्यादिना** । तदुक्तमिति तं प्रत्युक्तं मन्त्रेण विद्यां चेत्यादिनाऽऽपेक्षिकामृतत्वं फलमित्युक्तमस्माभिरिति ॥१५॥

---

१. अत्र सत्यस्य जीवस्येति रामानुजीयं व्याख्यानमयुक्तं ब्राह्मणे 'तद्यत्तत् सत्यमसौ स आदित्य' इति आदित्यान्तर्गतसत्यब्रह्मण एवात्र प्रत्यभिज्ञानात् । तदुपासकस्य मार्गयाचनात् । सत्यशब्दश्च सत्यं ज्ञानमनन्तं तत्सत्यं स आत्मा इत्यादौ ब्रह्मणि प्रसिद्धो न जीवे । प्राजापत्यः प्रजापतिपुत्रः सूर्यः न तु विष्णुः । योऽसावसौ पुरुषः सोऽहमस्मीत्यस्य च अहं = मदन्तर्यामी परमपुरुषाभिन्नमिति व्याख्यानम-युक्तम्, अस्मीत्यनन्वयात् । नियमान्तरकरणं परिभाषामात्रं वेदव्याख्याने नोपयुज्यते । एवमेव तत्त्व-मसीत्यत्रापि त्वदुक्तार्थे असिपदप्रयोगो विरुध्यते । अन्तर्यामिभेदाप्रसक्तेश्च ।

यत्तु माध्वव्याख्यानं—योऽसौ विष्णुः मुख्यप्राणे इति शेषः, सः अहं अहेयत्वात् अस्मि सर्वदा सन्नित्यर्थः । इदं च य एव लौकिकाः शब्दास्त एव वैदिकाः त एव तेषामर्था इति लोकवेदाधिकरण-न्यायविरुद्धं व्याख्यानम् । एवं वायुरनिलमिति मन्त्रेऽपि क्लिष्टकल्पनमयुक्तम् ।

२. तत्र हि—'मायां तु प्रकृतिं विद्यात्' 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादौ मायायाः परिणामित्वं तत्सहकारेणेश्वरस्य स्वोपाधिमायापरिणामैः जगदाश्रयत्वं चोच्यते । स्मृतयोऽपि मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति प्रकृतेरेव परिणामित्वमाहुः । ब्रह्मणो जगत्प्रकृतित्वं च जगदध्यासाधिष्ठानत्वरूपं विवर्तोपादानत्वं, अन्यस्य मुख्यस्यासम्भवात् । न च सृष्टिश्रुतेः सत्यमेव परिणामित्वं तत्रापि सत्यशब्दा-श्रवणात् स्वप्नसृष्टिश्रुतिवदुपपत्तेश्च । वाचारंभणश्रुतेः विकारानृतत्वनिर्णयात् ।

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् । ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳस्मर ॥१७॥
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

इति वाजसनेयसंहितोपनिषत्समाप्ता

ॐ [1]पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः

पूषन्निति । हे पूषन् । जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छतीत्येकर्षिः । हे एकर्षे । तथा सर्वस्य संयमनाद्यमः । हे यम । तथा रश्मीनां प्राणानां रसानां च स्वीकरणात्सूर्यः । हे सूर्य प्रजापतेरपत्यं प्राजापत्यः । हे प्राजापत्य । व्यूह विगमय रश्मीन्स्वान् । समूह, एकी कुरु, उपसंहर ते तेजस्तापकं ज्योतिः । यत्ते तव रूपं कल्याणतममत्यन्तशोभनं तत्ते तवाऽऽत्मनः प्रसादात्पश्यामि । किञ्चाहं न तु त्वां भृत्यवद्याचे, योऽसावादित्यमण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात् पूर्णं वाऽनेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः पुरि शयनाद्वा पुरुषः सोऽहमस्मि भवामि ॥ १६ ॥

वायुरिति । अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः । लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम् । मार्गयाचनसामर्थ्यात् । अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयात् । ओमिति यथोपासनमोंप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यब्रह्माभेदेनोच्यते । हे क्रतो सङ्कल्पात्मक स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मरैतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् ॥१७॥

पुनरन्येन मन्त्रेण मार्गं याचते—अग्ने नयेति । हेऽग्ने नय गमय सुपथा शोभनेन मार्गेण । सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय । राये धनाय कर्मफलभोगायेत्यर्थः । अस्मान्यथोक्तधर्मफलविशिष्टान्विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन् । किं च युयोधि वियोजय विनाशयास्मदस्मत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम् । ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः । किं तु वयमिदानीं ते न शक्नुम परिचर्यां कर्तुं, भूयिष्ठां बहुतरां ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः ।

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" । "विनाशेन मृत्युं तीर्त्वाऽसम्भूत्याऽमृतमश्नुत" इति श्रुत्वा केचित्संशयं कुर्वन्ति[2] । अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत्किंनिमित्तः संशय इत्युच्यते । विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वं च । ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः । सत्यम् । विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथाऽविद्यानुष्ठानं

व्याहृत्यवयव इति । तस्य भूरिति शिरः भुव इति बाहू सुवरिति प्रतिष्ठा पादावित्यर्थः ॥ १६-१७ ॥

मन्त्रान्पदशो व्याख्याय संक्षेपतो विचारमारभते—अविद्यया मृत्युं तीर्त्वेत्यादिना । अमृतत्वं चेति । अमृतत्वं च मुख्यमेव कस्मान्न गृह्यत इति सम्बन्धः । शास्त्रीययोर्ज्ञानकर्मणोर्विरोधाविरोधौ शास्त्रीयावेव ग्राह्यौ

---

१. अस्या उपनिषदः आरम्भे अन्ते च पूर्णमद इत्यादिमन्त्रः शान्त्यर्थत्वेन पठ्यते । तदर्थश्च—अदः परोक्षं ब्रह्म पूर्णम् = त्रिविधपरिच्छेदरहितम् । इदं शरीरद्युपाधिपरिच्छिन्नं ब्रह्म पूर्णं स्वेन रूपेण नतूपाधिपरिच्छिन्नेन इदं पूर्णं पूर्णात् परात्मनः एवोद्रिच्यते उद्गच्छति । उपाध्युद्भवेनोद्भवति, पूर्णस्य कार्यात्मनः पूर्णत्वमादाय अविद्याकृतोपाधिपरिच्छेदं तिरस्कृत्य पूर्णमेव केवलं ब्रह्मावशिष्यते इत्यर्थः ।

२. संशयं कुर्वन्तीति मृदूक्तिः । पूर्वपक्षं कुर्वन्तीत्यर्थः

विद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधावपि। यथा च [1]न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते—अध्वरे पशुं हिंस्यादिति। एवं विद्याविद्ययोरपि स्यात्, विद्याकर्मणोश्च समुच्चयः।

न, "दूरमेते विपरीते विषूची अविद्या या च विद्ये"तिश्रुतेः हेतुस्वरूपफलविरोधात्। विद्यां चाविद्यां चेति वचनादविरोध इति चेन्न। विद्याऽविद्याविरोधाविरोधयोर्विकल्पासम्भवात्। समुच्चयविधानादविरोध एवेति चेन्न। सहसम्भवानुपपत्तेः। क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न। विद्योत्पत्तावविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाऽऽश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा। यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति शोकमोहाद्यसम्भवश्रुतेः। अविद्याऽसम्भवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवोचाम। अमृतमश्नुत इत्यापेक्षिकममृतं, विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथास्माभिर्व्याख्यात एव मन्त्रार्थ इत्युपरम्यते॥ १८॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ
वाजसनेयसंहितोपनिषद्भाष्यं सम्पूर्णम्।

न तर्कमात्रेणेति परेणोक्ते सिद्धान्ती शास्त्रसिद्ध एव विरोध इत्याह—**न दूरमेते इति**। विषूची नानागती विद्याविद्ये दूरं विपरीते अतिशयेन विरुद्धे इत्यर्थः। **सहसम्भवानुपपत्तेरिति**। काऽनुपपत्तिः? काठके विरोधश्रवणात् तद्गतविद्याविद्ययोर्विरोधोऽस्तु। इह त्वविरोधश्रवणादविरोधो भविष्यतीति न वाच्यम्। विरोधाविरोधयोः सिद्धत्वेन विकल्पासम्भवात्। उदितानुदितहोमयोर्हि पुरुषतन्त्रत्वाद्युक्तो विकल्प इत्युक्तं, तर्ह्यविरोध एवास्तु समुच्चयविधिबलादिति चेन्न। मुख्यब्रह्मविद्याविद्ययोः शुक्तिविद्याविद्ययोरिव सहसम्भवानुपपत्तेः 'समुच्चयविधिरसिद्धः। सिद्धे समुच्चयविधौ तद्बलादविरोधावगमोऽविरोधावगमाच्च समुच्चयसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः। सहसम्भवानुपपत्तावपि क्रमेणैकाश्रये विद्याविद्ये स्यातामिति चेद्यदि पूर्वमविद्या पश्चात्तु विद्येति क्रमस्तर्ह्यिष्यत एव। यदि पश्चात्तर्ह्यसम्भव इत्याह—**न विद्योत्पत्ताविति**। पूर्वसिद्धाया अविद्यायाः प्रध्वस्तत्वादन्यस्याश्चोत्पत्तौ कारणासम्भवान्मूलाभावेन भ्रमसंशयाग्रहणानामपि विदुषोऽनुपपत्तिरित्यर्थः। विद्योत्पत्तौ मा भूदविद्या कर्म तु भविष्यति विदुषोऽपि व्याख्यानभिक्षाटनादिदर्शनादित्याशङ्क्याह—**अविद्याऽसम्भवादिति**। चोदनाप्रयुक्तानुष्ठानं हि कर्म ज्ञानेन सह तव समुच्चिचीषितं ब्रह्मात्मैकत्वं तु साक्षादनुभवतो न चोदना सम्भवति कामाभावात्कामिनो हि सर्वाश्चोदनाः। 'अकामिनः क्रिया काचिद्दृश्यते नेह कस्यचित्'। 'यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्', इति स्मरणात्। विद्वच्छरीरस्थितिहेत्वविद्यालेशाश्रयकर्मशेषनिमित्तं तु विदुषो भिक्षाटनादि न कर्म, चोदनाभावात्किन्तु यावत्प्राणशरीरसंयोगभावि तत्कर्माभासं तच्च विद्वान्न स्वगतं मन्यते कर्माध्यासोपादानाविद्याया असम्भवान्नैव किञ्चित्करोमीति प्रत्ययाच्चेति भावः। यदुक्तममृतशब्देन मुख्यमेवामृतत्वं किं न गृह्यते विद्याशब्देन च परमात्मविद्येति तत्राऽऽह—**अमृतमिति**। मुख्यामृतत्वग्रहणे हिरण्मयादिमन्त्रेण द्वारमार्गयाचनमनुपपन्नं स्यात्। न तस्य प्राणा उत्क्रामन्त्यत्र ब्रह्म समश्नुत इत्यादिश्रुतेः। ततो मुख्यार्थबाधाद्गौणार्थग्रहणं युक्तमित्यर्थः। यस्मादर्थान्तरं न सङ्गच्छते तस्मादित्युपसंहारः॥ १८॥

ईशाप्रभृतिभाष्यस्य शाङ्करस्य परात्मनः।
मन्दोपकृतिसिद्ध्यर्थं प्रणीतं टिप्पणं स्फुटम्॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दभगवत्पूज्यपादशिष्यभगवदानन्दज्ञानकृता
वाजसनेयसंहितोपनिषद्भाष्यटीका समाप्ता

---

१. न हिंस्यादित्येकं शास्त्रं, अग्निषोमीयं पशुं हिंस्यादित्यपरं तयोः विरोधो दृश्यते। अतः रागप्राप्तहिंसाविषयत्वेन अहिंसाशास्त्रं सङ्कोच्यते, प्रकृते तु समुच्चयः शास्त्रेणैव प्रतिपाद्यते तत्र को विरोध इति पूर्वपक्षः। निर्गुणविद्यायाः कर्मणा समुच्चयासम्भवादेवात्र सगुणोपासनरूपा विद्या गृहीता। क्रमिकसमुच्चयस्तु सम्भवत्येवेत्यदोषः।